।। अथ महालय श्राद्धप्रयोगः ।।

(स्मार्त पद्धतिः)

मध्याह्ने स्नातश्शुचिराचान्तः पवित्रपाणिः श्राद्धमारभेत । अशेषे + स्वीकृत्य (प्राची) अमुकगोत्राणां अमुकशर्मणां वसु + पाणां अस्मत्पितृपितामहाप्रपितामहानां अमुकगोत्राणां .... नाम्नीनां वसु + पाणां अस्मन्मातृपितामहीप्रपितामहीनां, अमुकगोत्राणां अमुकशर्मणां वसु+णां, अस्मत् सपत्नीक मातामह मातुः पितामह मातुः प्रपितामहानां, तत्तद्गोत्राणां तत्तशर्मणां वसुस्वरूपाणां पितृव्यमातुलादीनां वर्गद्वयावशिष्टानां सर्वेषां कारुणिकपितृणां, धुरिरुचिसंज्ञाकानां विश्वेषां देवानां, श्राद्धसंरक्षक श्रीमहाविष्णोश्च अक्षय्यतृप्त्यर्थं, कन्या (सिंह) गते सवितरि अषाड्यादिपञ्चामापरपक्षे सकारुणिकवर्गद्वयपितॄनुद्दिश्य सकृन्महालयश्राद्धं कर्तुं योग्यतासिद्धिमनुगृहाण ।।

(उप) देवताभ्यः पितृभ्यश्च + नमो नमः ।।

धुरिरुचिसंज्ञकेभ्यः विश्वेभ्योदेवेभ्यो नमः ।।

(प्रा) वसु + पेभ्यः अस्मत्पितृपितामह- प्रपितामहेभ्यो नमः । वसु + पाभ्यः अस्मन्मातृपितामहीप्रपितामहीभ्यो नमः । वसु + पेभ्यः अस्मत्सपत्नीकमातामह + हेभ्यो नमः । वसुस्वरूपेभ्यः सर्वेभ्यः कारुणिकपितृभ्यो नमः ।

(उप) श्राद्धसंरक्षक श्री महाविष्णवे नमः । देवताभ्यः पितृभ्यश्च + नमो नमः ।।

(प्रा) स्वामिनः अस्मिन् दिवसे सकारुणिकवर्गद्वयपितॄनुद्दिश्य सकृन्महालय श्राद्धं कर्तृकामोस्मि + भवन्तोऽनुगृह्णन्तु ।। (उप) श्राद्धभूमिं + प्रवर्तये ।। (उप) दर्भेस्वासीनः दर्भान् धारयमाणः । शुक्लां + शान्तये ।। ओं भूः + रोम् ।। अपवित्रः + पुण्यतिथौ अमुकगोत्राणां विष्णोश्च अक्षय्य तृप्यर्थं कन्यागते + सकृन्महालय श्राद्धं संभवता नियमेन + पार्वण विधनेन अद्य करिष्ये ।। (उप) अप उपस्पृश्य । ..... गोत्राणां + सकृन्महालय श्राद्धे धुरिरुचि संज्ञकानां विश्वेषां देवानामिदमासनम् । अपः प्रदाय । धुरिरुचिसंज्ञकेभ्यः विश्वेभ्यो देवेभ्यो भवता क्षणः कर्तव्यः । प्राप्नोतु भवान् ।। (प्रा) ... गोत्राणां + श्राद्धे गोत्राणां + शर्मणां वसु + पाणां अस्मत्पितृपि + महानां इदमासनम् । अपः प्रदाय। गोत्रेभ्यः ... शर्मभ्यः वसु + पेभ्यः अस्मत्पितृ + महेभ्यः भवता + भवान् ।। ... गोत्राणां + श्राद्धे .... गोत्राणां + अस्मन्मातृपितामहीप्रपितामहीनामिदमासनम् । अ + य । ... गोत्राभ्यः .... नाम्नीभ्यः वसुरुद्रादि + पाभ्यः अस्मन्मातृ+ महीभ्यः भवता + भवान् ।। ... गोत्राणां + श्राद्धे .... गोत्राणां शर्मणां वसु + पाणां अस्मत्सपत्नीकमातामह मातुः पितामह मातुः प्रपितामहानामिदमासनम् । अ + य । गोत्रेभ्यः ... शर्मभ्यः वसु + पेभ्यः अस्मत्सप + महेभ्यः भवता + भवान् ।। .... गोत्राणां + श्राद्धे तत्तद्गोत्राणां तत्तशर्मणांवसुस्वरूपाणां पितृव्यमातुलादीनां वर्गद्वय अवविशिष्टानां सर्वेषां कारुणिकपितॄणां इदमासनम् । अ + य । तत्तद्गोत्रेभ्यः तत्तशर्मभ्यः वसुस्वरूपेभ्यः पितृव्यमातुलादिभ्यः वर्गद्वयावशिष्टेभ्यः सर्वेभ्यः कारुणिकपितृभ्यः भवता क्षणः कर्तव्यः । प्राप्नोतु भवान् ।। (उप) ... गोत्राणां + श्राद्धे श्राद्धसंरक्षक श्रीमहाविष्णोः इदमासनम् । अ + य ।

श्राद्धसंरक्षक श्री महाविष्णवे भवता + भवान् ।।

अथ पादप्रक्षालनम् ।। विश्वेषां देवानां विष्णोश्च एकं कुण्डम् । अन्येषां पृथक्पृथक्कुण्डनि ।। अर्चनं, पादप्रक्षालनं, आचमनं, आसनदानम् । आवाहनं, ऊर्जं वहन्तीरिति तिलोदकनिनयनं च ।। अथ अर्घ्यग्रहणम् । विश्वेषां देवानां विष्णोश्च एकस्मिन् पात्रे, पित्रादीनां मात्रादीनां च एकस्मिन् पात्रे, मातामहानां कारुणिकानां च पृथक्पात्रयोः अर्घ्यग्रहणम् । अर्घ्यदानम् । वस्त्रगन्धादिदानम् । उद्धीयतामितिप्रश्नः । ये पार्थिवास इत्यादिमुखान्तं कृत्वा ।। श्रीपयित्वाऽभिघार्य इत्यादि । अवदानधर्मेणावदाय । यन्मेमातेत्यादि सप्त अन्नाहुतीः स्वाहा पित्र इत्यादि षडाज्याहुतीश्च हुत्वा । पुनरवदानधर्मेणावदाय । यन्मे मातुर्माता + रेतो मातुः पिता + शर्मणे स्वाहा ।। .... शर्मणे मातुः पित्र इदं नमम ।। यास्तिष्ठन्ति + रन्तरन्यं मातुः पितुर्दधे.... शर्मणे स्वाहा ।। पूर्ववत् त्यागः । यन्मेमातुः पितामही, मातुः पितामहः, यन्मेमातुः प्रपितामही, मातुः प्रपितामहः, येचेहमातुः पितरः स्वाहामातुः पित्रे, मातुः पित्रेस्वाहा इत्याद्यूहेन अन्नाज्याहुतीर्हुत्वा (उप) स्विष्टकृतं हुत्वा इत्यादि ब्रह्मोद्वासनान्तं कृत्वा अग्निमुपस्थाय । अन्नादिकमभिमृशेत् । एषतेतत इत्यादि समानम् । एषतेमातरिति, एषतेमातुस्ततेति च ।। भोजनस्थलशुद्ध्यादि ब्राह्मणविसर्जना समानम् । अथ पिण्डदानम् । सङ्कल्प्य । पञ्च दक्षिणाग्रान् दर्भान् संस्तीर्य । तेषु मार्जयन्तां मम पितर इत्यादिभिः मार्जयन्तां मम मातर इत्यादिभिः, मार्जयन्तां मम मातुः पितर इत्यादिभिः, मार्जयन्तां मम मातुः पितर इत्यादिभिः मार्जयन्तां मम मातुर्मातर इत्यादिभिः, मार्जयन्तां सर्वे कारुण्यपितर इति चक्रमशो मार्जयित्वा । एतत्तेतत इत्यादिभिः क्रमेण द्वादश पिण्डान्,

एतद्वः सर्वकारुणिक पितरो ये च वोऽनु इत्येकं पिण्डं पृथक्पृथग्वा पिण्डान् प्रदाय । मार्जयन्तामित्यादिभिः पूर्ववन्मार्जयित्वा, ये च वोऽत्र इति उपस्थाय । पुत्रान् पौत्रानिति पृथक्पृथक् परिषिच्य, न्युब्ज्यत्राणित्यादि पवित्रविसर्जनाचमन ब्रह्मार्पणपर्यन्तं समानम् । सकृन्महालय श्राद्धं तर्पणं परेऽहनि कुर्यात् ।। प्रत्यहं क्रियमाणस्य महालय श्राद्धस्याङ्गं तर्पणं तस्मिन्नेवाहनि कुर्यात् ।।

इति सकृन्महालय श्राद्ध प्रयोगः ।।

अथ हिरण्यरूपसकृन्महालय श्राद्ध प्रयोगः

स्नातः शुचिराचान्तः पवित्रपाणिः । देवताभ्यः नमो नमः ।। धुरिरुचिसंज्ञकेभ्यः विश्वेभ्यो देवेभ्यो नमः ।। (प्रा) वसुरुद्रा + पेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यो नमः । वसु + पेभ्यः अस्मन्मातामह मातुः पितामह मातुः प्रपितामहेभ्यो नमः ।। वसुस्वरूपेभ्यः सर्वेभ्यः कारुणिकपितृभ्यो नमः ।। (उप) श्राद्ध संरक्षक श्री महाविष्णवे नमः ।। देवताभ्यः + नमः । (प्रा) स्वामिनः अस्मिन् दिवसे मम सकारुणिकवर्गद्वयपितॄनुद्दिश्य हिरण्यरूपसकृन्महालय श्राद्धं कर्तुं योग्यतासिद्धिरस्त्विति भवन्तोऽनुगृह्णन्तु ।।(उप) दर्भेष्वासीनः दर्भान् धारयमाणः । श्रुक्लाम्बर + पुण्यतिथौ (प्रा) .... गोत्राणां ... शर्मणां वसु + णां अस्मत्पितृपितामहप्रपितामहानां, ... गोत्राणां .... नाम्नीनां वसु + णां अस्मन्मातृपितामही प्रपितामहीनां, ... गोत्राणां ...शर्मणां वसु + णां अस्मत्सपत्नीकमातामहमातुः पितामहमातुः प्रपितामहानां, तत्तद्गोत्राणां तत्तशर्मणां वसुस्वरूपाणां पितृव्यमातुलादीनां वर्गद्वयावशिष्टानां सर्वेषां

कारुणिक पितृणां धरिरुचिसंज्ञकानां विश्वेषां देवानां विष्णोश्च अक्षय्यतृप्त्यर्थं कन्यागते सवितरि आषाड्यादि पञ्चमापरपक्षे सकृन्महालय श्राद्धं हिरण्यरूपेण अद्यकरिष्ये (उप) अप उपस्पृश्य । ... गोत्राणां .... शर्मणां + हिरण्यरूपसकृन्महालयश्राद्धे धुरिरुचिसंज्ञकानां विश्वेषां देवानामिदमासनम् । अपः प्रदाय । धुरिरुचिसंज्ञकेभ्यः विश्वेभ्योदेवेभ्यः भवता क्षणः कर्तव्यः । प्राप्नोतु भवान् । (प्रा) .... गोत्राणां + श्राद्धे ... गोत्राणां ... शर्मणां वसु +पाणां अस्मत्पितृपितामहप्रपितामहानामिदमासनम् । अपः प्रदाय । .... गोत्रेभ्यः ... शर्मभ्यः वसु + पेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः भवता + भवान् । ..... गोत्राणां + श्राद्धे .... गोत्राणां ..... नाम्नीनां + पाणां अस्मन्मातृपितामही प्रपितामहीनामिदमासनम् । अपः प्रदाय । .... गोत्राभ्यः .. नाम्नीभ्यः वसु + पाभ्यः अस्मन्मातृपितामहीप्रपितामहीभ्यः भवता + भवान् ।। ... गोत्राणां + श्राद्धे ... गोत्राणां .... शर्मणां वसु + पाणां अस्मत्सपत्नीक मातामह मातुः पितामह मातुः प्रपितामहानामिदमासनम् । अपः प्रदाय । .... गोत्रेभ्यः ... शर्मभ्यः वसु + पेभ्यः अस्मत्सपत्नीकमातामह + हेभ्यः भवता + भवान् ।। ... गोत्राणां श्राद्धे तत्तद्गोत्राणां + कारुणिकपितृणां श्राद्धे तत्तद्गोत्राणां + कारुणिक पितृणामिदमासनम् । अपः प्रदाय । तत्तद्गोत्रेभ्यः तत्तशर्मभ्यः वसुस्वरूपेभ्यः पितृव्यमातुलादिभ्यः वर्गद्वयावशिष्टेभ्यः सर्वेभ्यः कारुणिकपितृभ्यो भवता क्षणः कर्तव्यः । प्रा + भवान् ।। (उप) गोत्राणां + श्राद्धे श्राद्धसंरक्षक श्रीमहाविष्णोः इदमासनम् । अ + य । श्राद्धसंरक्षक + विष्णवे भवता + भवान् ।। इति वृत्वा क्रमेण पृथक् पृथक् गन्धाद्युपचारान् दत्वा । हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलमदतश्शान्तिं प्रयच्छमे ।। ... गोत्राणां + श्राद्धे धुरिरुचिसंज्ञकानां

विश्वेषां देवानां तृप्त्यर्थं इदमाग्नेयं हिरण्यं सदक्षिणाकं सताम्बूलं धुरिरुचि संज्ञकेभ्यः विश्वेभ्यो देवेभ्यः संप्रददे न इति दक्षिणां ताम्बूलां च दत्वा । (प्रा) ... गोत्राणां - श्राद्धे ... गोत्राणां ... मम शर्मणां वसु + पाणां अस्मत्पितृपितामहप्रपितामहानां तृप्त्यर्थं इदमाग्नेयं + स ताम्बूलं ..... गोत्रेभ्यः .... शर्मभ्यः वसु + पेभ्यः पितृ + भ्यः सं प्रददे न मम । हिरण्य + मे ।। .... गोत्राणां + श्राद्धे .... गोत्राणां .... नाम्नीनां वसुरुद्रादित्यस्वरूपाणां अस्मन्मातृपितामही प्रपितामहीनां तृप्त्यर्थं इदमाग्नेयं + सताम्बूलं ..... गोत्रेभ्यः .... नाम्नीभ्यः वसु + पाभ्यः अस्मन्मातृपिता + हीभ्यः सम्प्रददे न मम ।। हिरण्यगर्भ + मे ।। .... गोत्राणां + श्राद्धे ..... गोत्राणां ..... शर्मणां वसुरु + पाणां अस्मत्सपत्नीकमातामह + महानां तृप्त्यर्थां इदमाग्नेयं + सताम्बूलं .... गोत्रेभ्यः .... शर्मभ्यः वसुरु + पेभ्यः अस्मभ्यः ..... वसुरु+ पेभ्यः अस्मत्सपत्नीकमातामह + हेभ्यः सम्प्रददे न मम ।। हिरण्यगर्भ + मे ।। ..... गोत्राणां + श्राद्धे, तत्तद्गोत्राणां तत्तत् शर्मणां वसुस्वरूपाणां पितृव्यमातुलादीनां वर्गद्वयवशिष्ठानां सर्वेषां कारुणिकपितॄणां अक्षय्यतृप्त्यर्थं इदमाग्नेयं हिरण्यं सदक्षिणाकं सदाम्बूलं तत्तद्गोत्रेभ्यः तत्तत् शर्मभ्यः वसुस्वरूपेभ्यः पितृव्यमातुलादिभ्यः वर्गद्वयावशिष्टेभ्यः सर्वेभ्यः कारुणिकपितृभ्यः सम्प्रददे न मम ।। (उप) हिरण्य + मे ।। .... गोत्राणां + श्रोद्धे श्राद्धसंरक्षक श्रीमहाविष्णोः तृप्त्यर्थं इदमाग्नेयं हिरण्यं सदक्षिणाकं स ताम्बूलं श्राद्धसंरक्षक श्रीमहाविष्णवे सम्प्रददे न मम ।। इति क्रमेण दत्वा । देवताभ्यः + नमः ।। आमावाजस्य + गभ्यात् । नमो वः + भूयासम् ।। इति प्रदक्षिणकृत्य । धुरिरुचिसंज्ञकेभ्यः विश्वेभ्योदेवेभ्यो नमः । (प्रा)वसुरु + पेभ्यः पितृपिता + हेभ्यो नमः । वसुरु + पाभ्यः अस्मन्मातृपि + भ्यो नमः । वसुरु +

पेभ्यः सपत्नीकमातामह + हेभ्यो नमः । वसुस्वरूपेभ्यः सर्वेभ्यः कारुणिकपितृभ्यो नमः । (उप) श्राद्धसंरक्षक श्री महाविष्णवे नमः । देवताभ्यः + नमः । इति नमस्कृत्य ।। (प्रा) अनेन मयाकृतेन सकारुणिकवर्गद्वय पितॄनुद्दिश्य हिरण्यरूपसकृन्महालय श्राद्धेन सकारुणिकाः वर्गद्वयपितरः नित्यतृप्ताः भूयासुरिति भवन्तोऽनुगऽह्णन्तु ।। इति प्रार्थ्य (उप) ब्राह्मणैरनुगृहीतानक्षतान् शिरसि धारयेत् ।। ब्राह्मणाः आशिषो वदेयुः ।।

ततः, शुक्लम्बरधर + न्तये ।। ओं भूः + वरोम् । ममो + पुण्यतिथौ (प्रा) गोत्राणां + प्रपिता महानां ..... गोत्राणां + मातृ + महीनां, गोत्राणां + सपत्नीक + महानां तत्तद्गोत्राणां तत्तशर्मणा + कारुणिकपितॄणां च अक्षय्यतृप्त्यर्थं कन्यागते + पक्षे सकारुणिकपितॄणां च अक्षर्थं कन्यागते + पक्षे स कारुणिणकवर्गद्वयपितॄनुद्दिश्य हिरण्यरूपसकृन्महालय श्राद्धाङ्गं तिलतर्पणं करिष्ये ।। (उप) अप उपस्पृश्य । (प्रा) आयात पितर इति कूर्चे कूर्चेषु वा पित्रादीन्, मात्रादीन्, सपत्नीकमातामहादीन्, कारुणिक पितॄंश्च आवाह्य तर्पयित्वा दर्भविसर्जनं पवित्रविसर्जनं च कृत्वा आचामेदित्यादि दर्शवत् कृत्वा ब्रह्मार्पणं कुर्यात् ।।

इति हिरण्यरूपसकृन्महालय श्राद्धविधिः ।।